# .. mAtA amRitAnandamayI aShTottara shata nAmAvali ..

# ॥ માતા અમૃતાનન્દમયી અષ્ટોત્તરશતનામાવલી ॥

## Document Information

Text title : mAtA amRitAnandamayi aShTottarashatanAmAvali
File name : amritanandamayi108.itx
Category : aShTottarashatanAmAvalI
Location : doc_deities_misc
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Michele snehikkyam at gmail.com
Proofread by : Michele snehikkyam at gmail.com, Sunder Hattangadi sunderh at hotmail.com
Description-comments : from The Archana Book
Latest update : June 10, 2009
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ માતા અમૃતાનન્દમયી અષ્ટોત્તરશતનામાવલી ॥

॥ ૐ અમૃતેશ્વર્યૈ નમઃ ॥

ધ્યાન શ્લોકઃ ।
ધ્યાયામોધવલાવગુણ્ઠનવતીં તેજોમયીં નૈષ્ઠિકીમ્
સ્નિગ્ધાપાઙ્ગવિલોકિનીં ભગવતીં મન્દસ્મિત શ્રીમુખીમ્ ।
વાત્સલ્યામૃતવર્ષિણીં સુમધુરં સઙ્કીર્તનાલાપિનીમ્
શ્યામાઙ્ગીં મધુસિક્તસૂક્તમ્ અમૃતાનન્દાત્મિકામીશ્વરીમ્ ॥

ૐ પૂર્ણ-બ્રહ્મ-સ્વરૂપિણ્યૈ નમઃ ।
ૐ સચ્ચિદાનન્દ-મૂર્તયે નમઃ ।
ૐ આત્મારામાગ્રગણ્યાયૈ નમઃ ।
ૐ યોગ-લીનાન્તરાત્મને નમઃ ।
ૐ અન્તર્મુખ સ્વભાવાયૈ નમઃ ।
ૐ તુર્ય-તુઙ્ગ-સ્થલીજુષે નમઃ ।
ૐ પ્રભામણ્ડલ-વીતાયૈ નમઃ ।
ૐ દુરાસદ-મહૌજસે નમઃ ।
ૐ ત્યક્ત-દિગ્વસ્તુ-કાલાદિ-સર્વાવચ્છેદ-રાશયે નમઃ । ૧૦ ।
ૐ સજાતીય-વિજાતીય-સ્વીય-ભેદ-નિરાકૃતે નમઃ ।
ૐ વાણી-બુદ્ધિ-વિમૃગ્યાયૈ નમઃ ।
ૐ શશ્વદવ્યક્ત-વર્ત્મને નમઃ ।
ૐ નામ-રૂપાદિ શૂન્યાયૈ નમઃ ।
ૐ શૂન્ય-કલ્પ-વિભૂતયે નમઃ ।
ૐ ષડૈશ્વર્ય-સમુદ્રાયૈ નમઃ ।
ૐ દૂરીકૃત-ષડૂર્મયે નમઃ ।
ૐ નિત્ય-પ્રબુદ્ધ-સંશુદ્ધ-નિર્મુક્તાત્મ-પ્રભામુચે નમઃ ।
ૐ કારુણ્યાકુલ-ચિત્તાયૈ નમઃ ।
ૐ ત્યક્ત-યોગ-સુષુપ્તયે નમઃ ।
ૐ કેરલક્ષ્માવતીર્ણાયૈ નમઃ । ૨૦ ।
ૐ માનુષસ્ત્રી-વપુર્ભૃતે નમઃ ।
ૐ ધર્મિષ્ઠ-સુગુણાનન્દ-દમયન્તી-સ્વયંભુવે નમઃ ।
ૐ માતા-પિતૃ-ચિરાચીર્ણ-પુણ્યપૂર-ફલાત્મને નમઃ ।
ૐ નિઃશબ્દ-જનનીગર્ભ-નિર્ગમાદ્ભુત-કર્મણે નમઃ ।
ૐ કાલી-શ્રીકૃષ્ણ-સઙ્કાશ-કોમલ-શ્યામલ-ત્વિષે નમઃ ।
ૐ ચિરનષ્ટ-પુનર્લબ્ધ-ભાર્ગવક્ષેત્ર-સમ્પદે નમઃ ।

ૐ મૃતપ્રાય-ભૃગુક્ષેત્ર-પુનરુદ્ધિત-તેજસે નમઃ ।
ૐ સૌશીલ્યાદિ-ગુણાકૃષ્ટ-જઙ્ગમ-સ્થાવરાલયે નમઃ ।
ૐ મનુષ્ય-મૃગ-પક્ષ્યાદિ-સર્વ-સંસેવિતાઙ્ઘ્રયે નમઃ ।
ૐ નૈસર્ગિક-દયા-તીર્થ-સ્નાન-ક્લિન્નાન્તરાત્મને નમઃ । ૩૦ ।
ૐ દરિદ્ર-જનતા-હસ્ત-સમર્પિત-નિજાન્ધસે નમઃ ।
ૐ અન્યવક્ત્ર-પ્રભુક્તાન્ન-પૂરિત-સ્વીય-કુક્ષયે નમઃ ।
ૐ સમ્પ્રાપ્ત-સર્વ-ભૂતાત્મ-સ્વાત્મ-સત્તાનુભૂતયે નમઃ ।
ૐ અશિક્ષિત-સ્વયંસ્વાન્ત-સ્ફુરત્-કૃષ્ણ-વિભૂતયે નમઃ ।
ૐ અચ્છિન્ન-મધુરોદાર-કૃષ્ણ-લીલાનુસન્ધયે નમઃ ।
ૐ નન્દાત્મજ મુખાલોક-નિત્યોત્કણ્ઠિત-ચેતસે નમઃ ।
ૐ ગોવિન્દ-વિપ્રયોગાધિ-દાવ-દગ્ધાન્તરાત્મને નમઃ ।
ૐ વિયોગ-શોક-સમ્મૂર્ચ્છા-મુહુ-પતિત-વર્ષ્મણે નમઃ ।
ૐ સારમેયાદિ-વિહિત-શુશ્રૂષા-લબ્ધ-બુદ્ધયે નમઃ ।
ૐ પ્રેમભક્તિ-બલાકૃષ્ટ-પ્રાદુર્ભાવિત-શાર્ઙ્ગિણે નમઃ । ૪૦ ।
ૐ કૃષ્ણાલોક-મહાહ્લાદ-ધ્વસ્ત-શોકાન્તરાત્મને નમઃ ।
ૐ કાઞ્ચી-ચન્દ્રક-મઞ્જીર-વંશી-શોભિ-સ્વભૂ-દૃશે નમઃ ।
ૐ સાર્વત્રિક-હૃષીકેશ-સાન્નિધ્ય-લહરી-સ્પૃશે નમઃ ।
ૐ સુસ્મેર-તન્-મુખાલોક-વિસ્મેરોત્ફુલ્લ-દૃષ્ટયે નમઃ ।
ૐ તત્કાન્તિ-યમુના-સ્પર્શ-હૃષ્ટ-રોમાઙ્ગ-યષ્ટયે નમઃ ।
ૐ અપ્રતીક્ષિત-સમ્પ્રાપ્ત-દેવી-રૂપોપલબ્ધયે નમઃ ।
ૐ પાણી-પદ્મ-સ્વપદ્વીણ-શોભમાનાંબિકા-દૃશે નમઃ ।
ૐ દેવી-સદ્યઃ-તિરોધાન-તાપ-વ્યથિત-ચેતસે નમઃ ।
ૐ દીન-રોદન-નિર્ઘોષ-દીર્ણ-દિક્કર્ણ-વર્ત્મને નમઃ ।
ૐ ત્યક્તાન્ન-પાન-નિદ્રાદિ-સર્વ-દૈહિક-ધર્મણે નમઃ । ૫૦ ।
ૐ કુરરાદિ-સમાનીત-ભક્ષ્ય-પોષિત-વર્ત્મણે નમઃ ।
ૐ વીણા-નિષ્યન્દિ-સઙ્ગીત-લાલિત-શ્રુતિનાલયે નમઃ ।
ૐ અપાર-પરમાનન્દ-લહરી-મગ્ન-ચેતસે નમઃ ।
ૐ ચણ્ડિકા-ભીકરાકાર-દર્શનાલબ્ધ-શર્મણે નમઃ ।
ૐ શાન્ત-રૂપામૃત-ઝરી-પારણે-નિર્વૃતાત્મને નમઃ ।
ૐ શારદા-સ્મારકાશેષ-સ્વભાવ-ગુણ-સમ્પદે નમઃ ।
ૐ પ્રતિબિમ્બિત-ચાન્દ્રેય-શારદોભય-મૂર્ત્તયે નમઃ ।
ૐ તન્નાટકાભિનયન-નિત્ય-રઙ્ગયિતાત્મને નમઃ ।
ૐ ચાન્દ્રેય-શારદા-કેલિ-કલ્લોલિત-સુધાબ્ધયે નમઃ ।
ૐ ઉત્તેજિત-ભૃગુક્ષેત્ર-દૈવ-ચૈતન્ય-રંહસે નમઃ । ૬૦ ।

ૐ ભૂયઃ પ્રત્યવરુદ્ધાર્ષ-દિવ્ય-સંસ્કાર-રાશયે નમઃ ।
ૐ અપ્રાકૃતાદ્ભુતાનન્દ-કલ્યાણ-ગુણ-સિન્ધવે નમઃ ।
ૐ ઐશ્વર્ય-વીર્ય-કીર્તિ-શ્રી-જ્ઞાન-વૈરાગ્ય-વેશ્મને નમઃ ।
ૐ ઉપાત્ત-બાલગોપાલ-વેષભૂષા-વિભૂતયે નમઃ ।
ૐ સ્મેર-સ્નિગ્ધ-કટાક્ષાયૈ નમઃ ।
ૐ સ્વૈરાધ્યુષિત-વેદયે નમઃ ।
ૐ પિઞ્છ-કુણ્ડલ-મઞ્જીર-વંશિકા-કિઙ્કિણી-ભૃતે નમઃ ।
ૐ ભક્ત-લોકાખિલાભીષ્ટ-પૂરણ પ્રીણનેચ્છવે નમઃ ।
ૐ પીઠારૂઢ-મહાદેવીભાવ-ભાસ્વર-મૂર્તયે નમઃ ।
ૐ ભૂષણામ્બર-વેશશ્રી-દીપ્યમાનાઙ્ગ-યષ્ટયે નમઃ । ૭૦ ।
ૐ સુપ્રસન્ન-મુખાંભોજ-વરાભયદ-પાણયે નમઃ ।
ૐ કિરીટ-રશના-કર્ણપૂર-સ્વર્ણપટી-ભૃતે નમઃ ।
ૐ જિહ્વ-લીઢ-મહારોગિ-બીભત્સ-વ્રૈણિત-ત્વચે નમઃ ।
ૐ ત્વગ્રોગ-ધ્વંસ-નિષ્ણાત-ગૌરાઙ્ગાપર-મૂર્તયે નમઃ ।
ૐ સ્તેય-હિંસા-સુરાપાનાદ્યશેષાધર્મ-વિદ્વિષે નમઃ ।
ૐ ત્યાગ-વૈરાગ્ય-મૈત્ર્યાદિ-સર્વ-સદ્વાસના-પુષે નમઃ ।
ૐ પાદાશ્રિત-મનોરૂઢ-દુસ્સંસ્કાર-રહોમુષે નમઃ ।
ૐ પ્રેમ-ભક્તિ-સુધાસિક્ત-સાધુ-ચિત્ત-ગુહાજુષે નમઃ ।
ૐ સુધામણિ મહાનામ્ને નમઃ ।
ૐ સુભાષિત-સુધામુચે નમઃ । ૮૦ ।
ૐ અમૃતાનન્દ-મય્યાખ્યા-જનકર્ણ-પુટસ્પૃશે નમઃ ।
ૐ દૃપ્ત-દત્ત-વિરક્તાયૈ નમઃ ।
ૐ નમ્રાર્પિત-બુભુક્ષવે નમઃ ।
ૐ ઉટ્સૃષ્ટ-ભોગિ-સઙ્ગાયૈ નમઃ ।
ૐ યોગિ-સંગ-રિરંસવે નમઃ ।
ૐ અભિનન્દિત-દાનાદિ-શુભ-કર્માભિવૃદ્ધયે નમઃ ।
ૐ અભિવન્દિત-નિઃશેષ-સ્થિર-જંગમ-સૃષ્ટયે નમઃ ।
ૐ પ્રોત્સાહિત-બ્રહ્મવિદ્યા-સમ્પ્રદાય-પ્રવૃત્તયે નમઃ ।
ૐ પુનરાસાદિત-શ્રેષ્ઠ-તપોવિપિન-વૃત્તયે નમઃ ।
ૐ ભૂયો-ગુરુકુલાવાસ-શિક્ષણોત્સુક-મેધસે નમઃ । ૯૦ ।
ૐ અનેક-નૈષ્ઠિક-બ્રહ્મચારિ-નિર્માતૃ-વેધસે નમઃ ।
ૐ શિષ્ય-સઙ્ક્રામિત-સ્વીય-પ્રોજ્વલદ્-બ્રહ્મ-વર્ચસે નમઃ ।
ૐ અન્તેવાસિ-જનાશેષ-ચેષ્ટા-પાતિત-દૃષ્ટયે નમઃ ।
ૐ મોહાન્ધકાર-સઞ્ચારિ-લોકાનુગ્રાહિ-રોચિષે નમઃ ।

ૐ તમઃ-ક્લિષ્ટ-મનોવૃષ્ટ-સ્વપ્રકાશ-શુભાશિષે નમઃ ।
ૐ ભક્ત-શુદ્ધાન્તરઙ્ગસ્થ-ભદ્ર-દીપ-શિખા-ત્વિષે નમઃ ।
ૐ સપ્રીતિ-ભુક્ત-ભક્તૌઘન્યર્પિત-સ્નેહ-સર્પિષે નમઃ ।
ૐ શિષ્ય-વર્ય-સભા-મધ્ય ધ્યાન-યોગ-વિધિત્સવે નમઃ ।
ૐ શશ્વલ્લોક-હિતાચાર-મગ્ન-દેહેન્દ્રિયાસવે નમઃ ।
ૐ નિજપુણ્ય-પ્રદાનાન્ય-પાપાદાન-ચિકીર્ષવે નમઃ । ૧૦૦ ।
ૐ પ્રસ્વર્યાપન-સ્વીય-નરક-પ્રાપ્તિ-લિપ્સવે નમઃ ।
ૐ રથોત્સવ-ચલત્-કન્યાકુમારી-મર્ત્ય-મૂર્તયે નમઃ ।
ૐ વિમોહાર્ણવ-નિર્મગ્ન-ભૃગુ-ક્ષેત્રો-જ્જિહીર્ષવે નમઃ ।
ૐ પુનસ્સન્તાનિત-દ્વૈપાયન-સત્કુલ-તન્તવે નમઃ ।
ૐ વેદ-શાસ્ત્ર-પુરાણેતિહાસ-શાશ્વત-બન્ધવે નમઃ ।
ૐ ભૃગુક્ષેત્ર-સમુન્મીલત્-પરદૈવત-તેજસે નમઃ ।
ૐ દેવ્યૈ નમઃ ।
ૐ પ્રેમામૃતાનન્દમય્યૈ નિત્યં નમો નમઃ । ૧૦૮ ।
॥ ૐ અમૃતેશ્વર્યૈ નમઃ ॥

This is from The Archana Book.
Encoded and proofread by Michele snehikkyam at gmail.com
Sunder Hattangadi sunderh at hotmail.com

.. mAtA amRitAnandamayI aShTottara shata nAmAvali ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*